दक्षिणाग्न्यनुगमने न तस्योत्पत्तिः॥ तत्कर्मणां लोप एव॥ यदि प्रमा
दाति होमकाल आहवनीये नुगच्छेत्तदा उद्धरणमप्यगास्त्वा दहत्या हु
ति गार्हपत्ये हुत्वा समंत्रं आहवनीये प्रणीय सर्वप्रायश्चित्तमाहव
नीये हुत्वा प्रकृतिवदग्निहोत्रहोमः नानुगते छिन्नमित्रादयो वा वि

Indira Gandhi National
Centre for the Arts

शेषेण सामान्यबाधात्॥ एवं गार्हपत्यानुगते उदानः प्राणमप्य
॥३०॥ गात्स्वाहेत्याहवनीये हुत्वा नित्यारणी भस्मना संस्पृश्य मंथयेदित्या
दिगार्हपत्यायतने निधाय सर्वप्रायश्चित्तं तत्रैव हुत्वा ततो होमशेषं
समाप्ति नान्यत्प्रायश्चित्तं॥ एवं दक्षिणाग्न्यनुगमने व्यान उदानमप्य
गादिति गार्हपत्ये हुत्वा योनितः कृत्वा सर्वप्रायश्चित्तं दक्षिणाग्नौ हु
त्वा पूर्ववद्धोमसमाप्तिः पूर्वाहुतौ हुतायां यद्याहवनीयोऽनुगतो
स्तदा यस्मात्काष्ठादग्निरुपशांतस्तात्किं कं केशकलामवनं तं
हिरण्यं निधाय प्रकृति मंत्रस्थाने अग्निर्दारो दारावृंमेः स्वाहेति राम
मंत्रेण हुत्वा गार्हपत्यदक्षिणाग्न्योर्हुत्वा आहवनीये कर्म तता ३२

प्यनस्य च परिसमूहनपरिषेचनपदार्थानां निवृत्तिः तत्रापि
रभावात्। आहवनीये होमे कृते अग्नौ तेनानुगते नाप्यनि स्तत्क
र्मणां लोपः। अनाज्ञातत्रयं च जपेत्। गार्हपत्यस्य तु सर्वावस्था
यामनुगमने मंथनं न पक्वेन घर्मिर्वादयावा॥ अथाश्वलायनानां
उद्धरणकाले गार्हपत्येऽनुगते भस्मनारणी संस्पृश्य इतो जज्ञे प्रथ
मेभ्यो योनिभ्यो अधि जातवेदाः सगायत्रिया त्रिष्टुभा जगत्यानुष्टुभा
चदेवेभ्यो हव्यं वहतु नः प्रजानन् इति मंथित्वा गार्हपत्यस्थितभस्मा
दोद्धृतदायतनं गोमयेनानुलिप्य मथितमग्निमायतने निधाया
हवनीयमानं प्रणीयपवित्राभ्यामाज्यमुत्पूय पवित्रं वेद्यां विस्तर्य

Indira Gandhi National
Centre for the Arts

स्रुक्स्रुवमाहवनीये निधाय संमृज्य स्रुचाग्निहोत्रग्रहणं नमह
॥३३॥ गृहीतं न तु गृहीतं वा गृहीत्वा गार्हपत्यानुगमनप्रायश्चित्तार्थं तप
स्वतेऽग्निरूढाने पूर्णाहुतिं होष्यामीति संकल्प्य॥ अग्नये तपस्वते ज
नद्वते पावकवते स्वाहा॥ अग्नये तपस्वते जनद्वते पावकवत इदं॥ स
र्वप्रायश्चित्तं विष्णुस्मरणं च कुर्यात्॥ मंथनादजायमानायां वन्ह
न्मतावन्मथितस्यैव॥ ततस्तपस्वतेऽग्निः पूर्णाहुतिर्वा॥ ततोऽग्निहो
त्रहोमो हुतप्रायश्चित्तेन सह यदि होमकालोऽपिगतस्तदा मनस्व
ती होमोऽपि कार्यः॥ अथ प्रणयनानंतरं आहवनीये विद्यमाने गा राम
र्हपत्योऽनुगच्छेत्तदाश्वलायनस्य अवशामे न्नामथितादवनीय ॥३३॥

मनुगमइत्वा पुनर्विहरणं॥ शाखा मायेभस्मनारण्यं संस्पृश्य मं
थयेत्॥ हुतो नतर्हि पुनस्तद्घ्राणं। आहवनीयमुपतिष्ठेत॥ अग्ने
सम्राळसि परायेरमस्त्वसहस्रकल्यायोर्जे पत्याय॥ सम्राळसिस्व
राळसि सारस्वतौ त्वोत्सौ प्रावतामन्नाद्यत्वायान्नपत्यायादथ इति
त तस्तपस्वतेऽग्निः पूर्णाहुतिर्वा विष्णुस्मरणं च ततो होमः॥ अग्नि
होत्रद्रव्याधिश्रयणार्थं गार्हपत्यादुद्धृते च गार्हपत्ये यदि उद्धृतस्य
गार्हपत्यस्य च नाशस्तदा गार्हपत्यं मथित्वा तपस्वतेऽग्निमित्यादि
र्वा विधाय पुनरंगारानिर्हृत्यादि होमं समापयेत्॥ अपादमात्रानुग
मने पुनरपो घसर्वप्रायश्चित्तमाहवनीये कुलायगृह्येप्रायश्चि

Indira Gandhi National
Centre for the Arts

॥३२॥ तं दक्षिणाग्नौ जुहुयात्॥ अपोटवर्त्तमाने गार्हपत्यानुगमने पौत
कदेशं गार्हपत्ये निधाय प्रायश्चित्तं यजुर्भेष प्रायश्चित्तं च॥ इत्यनुग
तप्रायश्चित्तं॥ अथोपघातप्रायश्चित्तं॥ परिषेचनादौ हविः प्रोक्ष
णाक्षोचनलयं देवाग्नेरुपरिगच्छेनदा॥ उपघातप्रायश्चित्तं करिष्य
इति संकल्प्य॥ पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्मणो व
सुनीथ यज्ञैः॥ घृतेन त्वं तनुवं वर्द्धयस्व सत्याः संतु यजमानस्य का
माः॥ इति समिधमादध्यात्॥ एवं मलोपहतौ समिदाधानं सर्वप्रा
यश्चित्तं च कर्त्तव्यं॥ तत्र द्वादशविधमलाः॥ ते च॥ वसासृक्शुक्रमज्ज राम
ज्जामूत्रविट् कर्णविट् नखः श्लेष्माश्रुपूयिकास्वेदो द्वादशैते ३२

नृणां मला इति॥ तथाश्वमार्जारनकुलगर्दभध्वांक्षाश्वपुरीषस्य
श्वापिदोपहतेषु शूद्रस्पर्शने शवपिंडादानोच्छिष्टनिर्गमने चाप
समिंधनं सर्वप्रायश्चित्तं च॥ रजस्वलामहापातकमहापतितादि
स्पर्शने पुनराधानं॥ इत्युपघातप्रायश्चित्तं॥ अथाग्निहोत्रद्रव्यं
पयमग्नावधिश्रितं गरशब्दं कुर्यात्॥ समाप पाप्मानमित्यभिमं
त्र्याहवनीये सर्वप्रायश्चित्तं हुत्वा विष्णुस्मरणं च कृत्वा कृतिवद्वा
नं कुर्यात्॥ आश्वलायनामपादं समानं॥ तत्रापि तान्यन इति विश
वः॥ अग्निहोत्रद्रव्यमधिश्रितं केशकीटादिना व्याप्तं तदा तत्सर्वं
स्फाने निक्षिप्याहवनीयं प्राप्य तूष्णीं समिधमाधायाहवनीया

Indira Gandhi National
Centre for the Arts

दुनरतोष्ठुंभस्मानिःसार्यतस्मिन्सर्वंहुतंजुहुयात्॥मनसामंत्रमु
॥३३॥ च्चारयेत॥एवमुन्नीतेष्वेवमेवप्रकारः॥अग्निहोत्रस्थालीप्रक्षाल्या
न्यंदुग्धमानीयाधिश्रयणादिकुर्यात्॥आपस्तंबानांपृष्टामिआय
क्ष्मावः॥घोश्वेमं॥उन्संदुहंति॥इतिमंत्राणांजपमित्यधिकं॥इत
रत्समानं॥यदिकेशकीटाद्यपनेतुंशक्यंतदपनीयस्थालीगतद्र
व्यंप्रोक्षणेनैवजुहुयात्॥अपिनातद्रव्यमप्सुप्रक्षिप्यद्रव्यांतरमु
त्पाद्यजुहुयात्॥तंडुलादिद्रव्येष्वेवं॥अग्निहोत्रद्रव्येअभिघृष्ट
मित्रोमनान्यातत्वंतेभुवाणामित्रोदाधारपृथिवीमुतद्यां॥मित्रः राम
कृष्टिरनिमिषाभिचष्टेमित्रायहव्यंघृतवज्जुहोतन॥इतिमंत्रेण ॥२२॥

समिद्वेकामाहवनीयेहुत्वासर्वप्रायश्चित्तंविष्णुस्मरणंचकुर्या
त॥आपस्तंबानामप्येतदेवप्रसक्तेअनुकल्पान्॥अग्निहोत्रद्रव्य
मुद्वासनकालेविष्यंदेनतदाविष्यंदनमात्रमादाय॥महीद्यौः
पृथिवी॰नइमंयज्ञंमिमिक्षतां॥पिपृतांनोभरीमभिः॥इतिमंत्रेणाहवनीयेन्यस्मानित्तीयततस्था
लीगतेनहोमंकुर्यात्॥विष्यंदनेनाग्निंभूमिंवाप्राप्नुयात्तदास्थाली
गतमपिदुष्टंनद्रव्यमप्सुक्षिप्यान्यदग्निहोत्रस्थालींप्रक्षा
ल्यान्यमानीयपुनर्दधज्जुहुयात्॥इतिहविर्व्यापत्तिप्रायश्चित्ता
नि॥अथस्कन्नाप्रायश्चित्तं॥यदिदुह्यमानंस्कंदेत्तदा॥यदद्य
दुग्धंपृथिवीमसृप्तयदोषधीरत्यसरद्यदापः॥पयोगृहेषुपयो

॥३४॥ अघ्नियास.पयो वत्सेषु पयोअस्कन्नमायि॥ इत्यभिमं॥ समुद्रंवः
प्रहिणामिस्वांयोनिमपिगच्छत॥ अच्छिद्रः प्रजयाभूयासंमापरा
सेचिमत्पयः॥ इत्याभिरभ्युक्ष्य सर्वप्रायश्चित्तं हुत्वा शेषेण होमः
यजमानपत्न्योरागामि होमकालादर्वाग्नां सर्वस्कंदनेन्यां दुग्ध्वा
होमः॥ स्थाल्या अयोग्यानेरन्यत्नादायसंस्कृत्य तस्या दुग्ध्वा होमः
भिन्नामप्स्व प्रक्षिपेत्॥ अथ तस्य दशावस्था भवति दुह्यमानं १
दुग्धं २ ह्रियमाणं ३ हृतं ४ अधिश्रयमाणं ५ अधिश्रितं ६ उ
द्वास्यमानं ७ उद्वासितं ८ उन्नीयमानं ९ उन्नीतं १०॥ एतास्ववराम
स्थास असर्वस्कंदने द्रव्यान्तरेण प्रायश्चित्तं हुत्वावशिष्टेन ॥३४॥

वयथाकर्थंचिद्धोमः॥ सर्वस्कंदने स्कन्नप्रायश्चित्तं विधायान्यां
दुग्ध्वा होमः॥ एवमन्येद्रव्येतदानीयहोमः॥ चतुरवत्तानां चतुर्था
प्राक् स्कंदने स्कन्नं विगतं स्थाल्याम्मानीय पुनरुन्नीय होतव्यं च
तुर्थोन्नयनोत्तरं सर्वस्कंदने॥ अस्कान्द्यौः पृथिवीं॥ मस्कान्वृषभो
युवागाः स्कन्नेमा विश्वा भुवनास्कन्नोयज्ञः प्रजनयतु॥ अस्का
नजनिप्राजन्या स्कन्नाज्जायते वृषा॥ स्कन्नात्प्रजनिषीमहि॥
इति स्कन्नमभिमंत्र्य उन्नभयं पृथिव्यामिधादां दिव्येन भ॥ उद्गा
दिव्यस्य नो देह्यीशानो विसृजा दृतिं॥ इत्याभिरभ्युक्ष्य॥ पुनः स्था
ल्या उन्नीय होमः॥ असर्वस्कंदने स्कन्नमाचमंत्राभ्युक्ष्य पूर्व

Indira Gandhi National
Centre for the Arts

क्रमंत्राभ्यां ततः शेषेण होमः॥ भक्षस्यलोपः॥ तदेतत्स्रुवमात्र
॥३५॥ स्कंदने॥ स्कवारूनेतुन प्रायश्चित्तं॥ उन्नीतं स्थालीगतं चाभयस्कं
दनेतु स्कन्नाभिमंत्रणाभ्युक्षणं कृत्वा पुनरप्यादाय होतव्यं॥ जा
यापत्योरनशने च॥ दुर्वतोरिशवीहीत्यारभ्य दशहोतृसमाप्तिपर्य
तं यदि शुचौ देशे स्कंदनं तदा स्कन्नप्रदेशे उपविश्य स्कन्नं पुनः स्न
चिं गृहीत्वा॥ तद्देवयादृक्वीदृक् होतव्यं॥ मार्जनानंतरं पुनर्धृतादाना
दि होमं कृत्वा वृद्धिरसीत्यपामुपस्पर्शनं कृत्वा जुह्वासखकृद्धीला
अवतंडो हो वरुण॥ कृतानि॥ हुतम्॥ येस्याम त्वा हेति मंत्राभ्यां हु राम
त्वा होमशेषं समापयेत्॥ अशुचिदेशे स्कंदने अस्कानित्यादिना ३५

यश्चित्तं दत्वा यवारुणीन्यामेकाहुतीं हुत्वा पुनः स्थालीतन्नी
य होमशेषं समापयेत्॥ यजमानदंपत्योरनशने॥ वदशहोतृस
माप्त्यनंतरं प्राक् कुशसमीपमादनात् स्कन्नेस्कान्नाभिमर्शना
दि कृत्वा स्कन्नाशिष्टेन होमः॥ नाशस्कन्नद्रव्यपुनर्ग्रहणं॥ सर्व
स्कंदने अभिमर्शनादि कृत्वा मसंस्कृतमन्यद्रव्यं प्रक्षिप्य होमः का
र्यः यदि दर्भपुसाधमानं स्कंदेत तदा सर्वस्कंदने च स्कन्नाभिमर्श
नं कृत्वा स्कन्नस्कंसमीपे अन्यत्संजातीयद्रव्यस्य प्रक्षिप्य हो
मः॥ दर्भपुस्थापितं पर्वाहुतं पर्वस्कन्ने अभिमर्शनादि कृत्वा स्क
न्नाशिष्टेन होमः॥ सर्वस्कन्ने अन्येन स्थालीमानीय तत्रैव सन्नी

Indira Gandhi National
Centre for the Arts

यमोहोमः॥ स्रुक्स्रुगादानादाज्यहोमात्पूर्वं यदि स्कन्नेतत्र केशवि
॥३६॥ कारेणनित्यत्वेन पुनर्होममिच्छंति॥ रुद्रदत्तो विकल्पेनेच्छंति यदि
क्रियतेनेतदा पूर्ववत्कर्तव्यः॥ पूर्वाहुतौ हुतायां सविशिष्टं यदि स्कंद
त्पूर्वाहुतौ सर्वेवापनेतदास्ताल्यात्स्त्रिरसृन्नीय॥ यत्र वेत्थ वन
स्पते देवानां गुह्यानामानि तत्र हव्यानि गामय॥ इति वानस्पत्यय
र्ज्ञां समिधमाधाय॥ उत्तराहुतिं हुत्वा पुनर्होमं च कुर्यात्॥ अभ्युत्का
यनानामप्येवं॥ अन्यावाग्निहोत्रे नैव होमः स्रुवमात्राद्गूनस्कंद
नेसर्वप्रायश्चित्तमेव॥ भस्मकुर्वां दोस्कंदने विशेषः भस्मन्यग्नौ गाम
हविर्धाने धाम्नो।र्णा।पिवर्हिषि। कूर्चे विप्रस्य पाणौ वे स्कन्नदो ॥३६॥

पानविघ्नतर्जनि॥ तंडुलादि पयोव्यतिरिक्तकठिनद्रव्यस्कंदने
नभ्युत्सायनानां॥ देवाजनमगन्यज्ञस्त्वस्यमासारवनुवर्द्धतां॥ भू
तिर्घ्नेनमंत्रं तु यज्ञोयज्ञपतिमहंसः॥ भूपतये स्वाहा भुवनपतये
स्वाहा भूतानां पतये स्वाहा यज्ञस्यत्वामनयानमयानिमयाप्रतिमया
हप्सश्चस्कंदद्येनेन स्कन्ननिमृश्य सर्वप्रायश्चित्तं हुत्वा स्कन्नद्रव्य
मप्सुनिक्षिपेत्॥ आपस्तंबानामप्येतदेवतंडुलादिद्रव्ये पुविक
ल्पेनभवति॥ मायंहोम सूर्योज्योतिरितिधमादामंत्रपठितस्वाहाश्च
हुतमन्तदास्कन्नत्वपुनर्होमः॥ एवं प्रातः॥ इति स्कन्नप्रायश्चित्तानि अ
थाग्निहोत्रेत रागमनेआपस्तंबानां॥ अग्निहोत्रेअधिश्रितेतराय

Indira Gandhi National
Centre for the Arts

॥३७॥ दिग्भागे ऽन्तरा गार्हपत्याद्भस्म गृहीत्वा गार्हपत्यादाहवनीयपर्यन्तं इ-
दं विष्णुरित्यनेन भस्मरेखां कुर्यात्॥ तेनैव मंत्रेण भस्मनाशुनः पदं
प्रतिवपेत्॥ सर्वप्रायश्चित्तं कुर्यात्॥ उद्वासनादूर्ध्वं पूर्वोक्तं विधाय
उदकेन प्रोक्षणं गोराक्रमणं चाधिकं॥ एवं मार्जारमनुष्यगमने च॥ आ-
श्वलायनानामग्निहोत्रद्रव्येकुशोपप्रमादिनेनरश्वापुरुषा वा गच्छे-
न्तराग वातिक्रमणं शुनो गमने तस्मनाशुनः पदं पुरस्तादिदं विष्णुर्वि
चक्रम इति मंत्रेण॥ प्रतिपदं मंत्रः भस्मधारामुदकधारां च तंतुं तन्व-
न्निति मंत्रेण गार्हपत्यादाहवनीयपर्यन्तमविछिन्नां कुर्यात्॥ प्रतिधा- राम
रां मंत्रावृत्तिः॥ आहवनीयमनुगमय्य पुनः प्रणीय॥ यदग्ने पूर्वं प्रहि- ३७

तं पदा हतेन हर्यस्य गर्भिनन्ताननतान्॥ नचराय कामनुसं नवेतामन्तः
स्तुन्न सकमन्यावा जन्त्या॥ त्वमग्ने सप्रथा असि नु होता वरेण्यः॥ त्व-
या यज्ञं वितन्वते॥ इत्येताभ्यामुपस्थाय अग्निहोत्रहोमं समाप्य॥ अं-
तरागमनजन्यदोषपरिहारार्थं पथिकृते। हि स्थाने पूर्णाहुतिं होष्या-
मि॥ इति संकल्प्य आहवनीयं विहृत्य आज्यमुत्पूय स्रुचि चतुर्गृ-
हीतं गृहीत्वा॥ अग्नये पथिकृते स्वाहेत्याहवनीये हुत्वा सर्वप्रायश्चि-
त्तं यथाशक्ति दक्षिणादानं विष्णुस्मरणं च कुर्यात्॥ मार्जारगमनेप्ये-
वं॥ इत्यंतरागमनप्रायश्चित्तं॥ अंगारबहिर्गमने प्रायश्चित्तं समाप्ति-
पर्यन्तं स्थितियोग्यस्तदा परिवाजपतिः कविरग्निरित्यान्यक्रमात्

Indira Gandhi National
Centre for the Arts

दधइन्वानिद्राशुपइति त्रिः प्रदक्षिणं कृत्य इदंतएकं पर ऊतएकं तृतीयेन ज्योतिषा संविशस्वा संवेशनस्तनुवे चारुरेधिप्रियदेवा
॥३८॥ नां परमेजनित्रे इति मंत्रेणायतने प्रक्षिप्य सर्वप्रायश्चित्तं कुर्यात्
इदं चाहवनीयएवंनान्याग्निषु॥ अन्ये पुनर्द्वाप्रक्षेपे सर्वप्रायश्चि
त्तं चाश्वलायनानां तु परिवाजपतिः कविरिति पारक्रमण वर्जं
अग्निहोत्रहवणी निपततदान्यामादत्य तया हुत्वाभिन्नामग्निहो
त्रहवणीं माहवनीये प्राङ्दंडां प्रत्यक् पुष्करां प्रास्य सर्वप्रायश्चित्तं
जुहुयात् एवं सर्वेष्वपि वानस्पत्येषु आज्यस्थाल्यादि मृन्मयानि राम
त्वेनु अप्सुत्यागः आहिताग्निः प्रातरस्नातोग्निहोत्रं जुहुयात् ३८

तदाग्नये वरुणायाष्टाकपालं निर्वपेत् त्वन्नो अग्ने स त्वं नो अग्ने इति
याज्यानुवाक्ये पूर्णाहुतिं वा जुहुयात् यद्यस्तमिते अस्तमिते त्वा
त्मा होमे भवति तदा तस्मिन्नेवाहवनीये पुनर्होमं कुर्यात् होमो
त्तरं यजमानो गार्हपत्याहवनीयावनुपातिष्ठते भवतं नस्समनसा
वघ्न इति एवं प्रातः उदितहोमिनां अनुदितहोमिनां उदयान
न्तरं पुनराधानं यद्यग्निहोत्रहोममध्ये ग्रहणं चेत्तदा सूर्यग्रहणाऽपर
णाहवनीये कुर्वन्साद्यन्त्येन होममध्यग्रहणजन्यदोषपरिहारा
र्थं इदं यन्मम स्यापि दुरुक्तं जातवेदसं चित्तदेवानामित्येते मंत्रेरा
ज्याहुतिं होष्यामीति संकल्प्य पूर्वोक्तमंत्रैर्हुत्वा सर्वप्रायश्चित्तं

Indira Gandhi National
Centre for the Arts

ष्णुस्मरणं च कृत्वा एषा ते अग्ने इत्यादि प्रतिपद्यते॥ आश्वलायनानामप्येवं
तन्त्राज्योत्पवनमाधिकं॥ प्रायश्चित्तसारे तु दृष्टग्रह्रपादं॥ भावीकारमतं च
॥३९॥ दग्धहेतवो नवायमादित्या इत्येताभ्यामाहुती द्वे सर्वप्रायश्चित्तं चवि
ष्णुस्मरणं च॥ अग्निहोत्रहोमे यदग्नेर्यानि कानि चेत्स्कपसमिंधनादू
र्ध्वेमाहवनीयहोमात्पूर्वं यदि यजमानो भार्या पि वेक्षानदा॥ यत्तेवयपुरु
षत्रायविद्वाविद्वांऽसश्च कृमाकश्च नागः॥ कथा घसा ऽ अदितेरना
गाच्येनाऽसिशिश्रथो विषगग्ने॥ यथा हनद्दसनागो यदि चित्पादिषिना
मसुंचनायजत्रा॥ एवमस्यमस्मत्प्रमुचव्यः हः प्रातार्यग्ने नतरान्नआ राम
युः॥ इति द्वाभ्यामाहुती जुहुयान्नपद्दाहोमेग्निःस्विष्टकृद्देवता॥ उपस ३९

मिंधनात्पूर्वं वेनदाप्रातभर्त्री। छिःपूर्णाहुतिर्वा। एवं यत्किंचिदंगलोप
कुन्नयने न्यूनाधिकभावे मंत्रक्रियाविपर्यासे कर्तृद्रव्यविपर्यासे यजमा
नपत्न्योरसन्निधाने व्रतलोपे मार्जारादि नामंतरागमने यस्मिन्नज्ञा
तेदोषेनाज्ञातं पुरुषसंमितो॥ यस्पाकत्रा॥ त्वमग्ने व्रतपा॥ यद्वोवयं
प्रामिनाम॥ त्वंनोअग्ने॥ सत्वंनोअग्ने॥ व्याहृती श्वनपेत सर्वसागता
सि विष्णुस्मरणं च॥ आश्वलायनानां कर्ममंत्रविपर्यासे यद्वो देवा इत्य
चा होमः सर्वप्रायश्चित्तं विष्णुस्मरणं च। इत्यग्निहोत्रप्रायश्चित्तानि
अथ प्रसंगाद्दर्शपूर्णमासेष्टिप्रायश्चित्तानि॥ तत्रादौ अन्वाहितप्रायश्चि
त्तं॥ अथापस्तंबाश्वलायनयोः समानएव अन्वाधानानंतरमाहवनी

Indira Gandhi National
Centre for the Arts

योनुगच्छेत्तदा अन्वाहितमाहवनीयमुत्पादयिष्यामीति संकल्प्य आ
॥४०॥ यतनस्तंभस्य दूरे। कृत्वा तदायतनं गोमयेनोपलिप्य अन्वाग्निरुपसाम
ग्र मख्यदन्वह्नानि प्रथमो जातवेदाः अनु सूर्यस्य पुरुत्रा च रश्मीननु द्या
वापृथिवी। अततानिति मंत्रेणान्यमाहवनीयं प्रणीय भूरिति मनसा य
जमान उपतिष्ठेत॥ असंस्कृतमाज्यं स्रुवेणाहवनीये जुहोति॥ यो अ
स्मिन्देववीतये हविष्मान् आविवासति तस्मै पावक मृडय स्वाहा॥ अ
ग्नये पावकायेदं॥ ततोनुध्यांस कृ हीला इदं विष्णुः स्वाहा॥ वि
ष्णव इदं॥ सर्वप्रायश्चित्तं हुत्वा ततो यजमानो जपति॥ अग्ने व्रतपते व्रतं गम
तं चरिष्यामि तच्छकेयं तन्मे राध्यतां॥ वायो व्रतपते॥ आदित्य व्रतप ४०

पते॥ सम्राडसि व्रतपा असि॥ ध्यासमिति॥ यदि गार्हपत्योनुगच्छेत्त
दानन्तरमनारणी संस्पृश्य तूष्णीं मथित्वायतने निधाय भूरित्युपस्थाय
पूर्ववद्धुत्वा यजमानोपस्थानांतं समानं॥ दक्षिणाग्न्यनुगमने योनित
आध्य भूरित्यादियजमानोपस्थानांतं समानं॥ प्रणयनानंतरं अन्वाधा
नात्प्राक् आहवनीयानुगमने देशकालकथनांते प्रणयनानंतरमाहवनीया
नुगमने सर्वप्रायश्चित्तं होष्यामीति संकल्प्य असंस्कृताज्येनाहवनी
ये सर्वप्रायश्चित्तं जुहुयात्॥ एवं दक्षिणाग्निरदिगमने तथैवाग्निषु
अग्निहोत्रहोमात् मध्यादि॥ नान्यत्प्रायश्चित्तं॥ पिंडपितृयज्ञे एकोल्मु
कनाशे सर्वप्रायश्चित्तं हुत्वा पुनर्दक्षिणाग्नेराहरणं॥ अभागिनीमु

प्रायानिर्वापेतत्संसृष्टद्रव्यमुत्कीर्य तत्का पुनर्भागिन्यै निर्वपत्सर्वप्राय
॥४२॥ श्चित्तं च॥ एवं द्रव्यव्यत्यासेन द्रव्यं परिस्पन्दनिर्वापादिपुनर्यागः॥ एवं
निर्वापविस्मृतोऽन्तरितप्रायश्चित्तं यद्वो देवा सर्वप्रायश्चित्तं च कृत्वा
पुनर्निर्वापं कुर्यात्॥ एवं प्रोक्षणादिमंत्रेषु देवतानिपर्यासे सर्वप्रायश्चि
त्तं हविः शेषो ह्यासनम कृत्वा ऽनुयाजार्थं यदा श्रावणं करोति तदा यद्वो
देवेत्याहुतिं जुहुयात्॥ यदि प्रणीता आपो भूमौ निःशेषं वापने सुः॥ शे
षं वा गच्छेयुस्तदा संवापात्पूर्वं चेत्तदा आपो हि ष्ठेति तिसृभिः पुनर्यद्दी
त्वात्तमप आपः इत्याप्स्वाहुतिं जुहुयात्॥ स्कन्नाप शेषेण प्रायश्चित्तं शि राम
ष्टेनैव संवापं कृत्वा सर्वप्रायश्चित्तं कुर्यात्॥ संवपनादूर्ध्वं सर्वप्रायश्चि ४२

त्तमेव दर्शपूर्णमासादौ हविः प्रोक्षणं कुर्वन्प्रणीताभिः प्रोक्षेत्तदा पु
नस्ताभ्यन्नपःसमिद्धाधानं कुर्यात्॥ एप धानानां कुर्यादेकपालानाम
न्तमभिघेनन्॥ ततगायत्र्या गनाक्षरयामं भोदमि इति संधानं कु
र्द्व्यैः संधाय उपरिगार्हपत्ये धारयित्वा तस्योपर्यान्येन मानोऽयोति नु
यता मित्युच्चाहुत्वा॥ ब्राह्मणाभ्यामिभिर्भूमिमगान्मातामातरमप्यगात् भू
यास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतां॥ इत्येतेन नाभिमंत्रणं कृत॥ अ
भिन्नो घर्मो जीरदानुर्यत आर्त्तस्तदगन्पुनः इध्मो वेदिः परिधयश्च स
र्वे यज्ञस्यायुरनुसंचरंति॥ इत्यप्रक्षालितपनितोऽन्यत्कपालमादत्वा
सादनाभिमर्शनप्रोक्षणादि कृत्वा त्रयश्चिशः गातेन नद्दोति कपालमा

Indira Gandhi National
Centre for the Arts

कप्रयुक्ते प्रक्षिपेत्॥ उपाहितेषु कपालेषु यदन्यद्भिद्येत तदा गायत्र्या त्वा
॥ ४२॥ गृह्णामि ॥ इत्यादिना संधानादि अप्सु प्रक्षेपान्तं कृत्वा॥ अन्यत्कपालमा
हृत्य भिन्नस्य कपालस्य स्थाने त्रयस्त्रिंशत्तन्तव इत्यादिध्यानं॥ क
पालमधिश्रयणात् पूर्वं भिद्येत तदा मही द्यौः पृथिवी च न इ
ति स्रुवाहुतिं जुहोति ततोऽविधिनान्यत्कपालमुपधाय पुरोडाशाधि
श्रयणादि करोति॥ पुरोडाशोद्वासनानन्तरं भेदने नाशे वा सर्वप्रायश्चि
त्तमेव॥ आश्वलायनानां तु कपालं यदि भिद्येत तदा गायत्र्या त्वा गृह्णा
क्षरस्य संदधामीति मन्त्रेण संधाय॥ अभिन्नो धर्मो जीरदानुर्यत आर्त्त राम
स्तदगन्पुनः॥ इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनुसंतरन्तु॥ त्र ॥४२॥

यस्त्रिंशत्तन्तवो यान्वितन्वत इमं यज्ञं स्वधया ददन्ते तेषां छिन्नं प्रतिद
धामि यजत्र स्वाहा घर्मो अप्येतु देवानिति मन्त्राभ्यां जले प्रक्षिपेत्॥ ततः
सर्वप्रायश्चित्तं॥ एवं श्वादिभिर्लीढानि अशुचिद्रव्यस्पृष्टानि भिन्ना
नि वा भूमिर्भूमिमगान्माता मातरमप्यगात्॥ भूयास्म पुत्रैः पशुभिर्यो
नो द्वेष्टि स भिद्यतामिति जले प्रक्षिप्य सर्वप्रायश्चित्तं चेति॥ दर्शपूर्णमा
सयोरन्वाधानदिने यदि पत्नी रजस्वला तदा तामवरुध्य यागं कुर्यात्
तत्र योक्त्रवेदः पश्चादुदगग्रं स्थापयेत्॥ शेषे पत्नीसन्नहनादि लुप्यते
तेजासीत्यधिश्रयणं तेजसा चक्षुषा दानं च लुप्यते॥ पत्नीसंबंधमुप
स्थानादि होतृकर्म च पूर्णपात्रसंबंधि लुप्यते॥ संपत्नीहोमश्च विधे

यः एवमिष्टिं समापयेत्॥ ततो ऋतुगमने अमृतमस्मिसार्व चोरस्पृथिवी॥
॥४३॥ ऽ समादमृःकांत वेदसंभवाददसदरेनोदधावद्देषुः सेपुत्रायवेनवैरा
यस्योपायस्क प्रनाम्नायस्कं वा गायेति आव्हायां॥ विष्णुर्योनिमित्यादित्र
योदगाभिरभिमंत्र्य हिं कृत्यतामुपेयात्॥ बहुपत्नी कस्यापत्नी कर्माण्य
न्याभिः कुर्यात्॥ एवं सतायांस्तत कांतग्नेष्टिः॥ एवं विकृतिषु अन्वाधा
नादूर्ध्वं नामपरुध्येवयागः॥ ततः प्रागनारंभः॥ प्रोषितयजमानेप्रस्येदानि
ऋतुमतानेनदापनमेदनिस्याग॥ प्रथमापिंडिस्तुतौ यज्ञारंभेयदिरज
स्वला नदादर्शान्तरसनसोनारं हुत्वा पिंडपितृयज्ञारंभः॥ द्वितीयादौन गम
प्रतिबंधः दर्शपूर्णमासादिषु पवित्रकरणादूर्ध्वं प्रस्तरप्रतिपत्तिप ॥४३॥

र्यंतं यदि मध्ये पानेन नश्येत् तदा पवित्रस्थ इति पवित्रं छित्वाग्निहोम
नमाद्दत्यान्वितनुमन्त्र्य नेन पवित्रं कार्यं कृत्वा हविः समाप्य पुनः प्रणयना
दि प्रायश्चित्तार्थं अग्नये पावकाय अष्टाकपालं निर्वपेत्। अशक्तानस्मिन्नेव
हिं तत्र तत्र नधानया गार्हपत्यं च तु गृह्य तमान्यस्थाल्यानदाय अग्नये पवि
त्रवतेनस्वाहेति पूर्णाहुतिं जुहुयात्॥ दर्शपूर्णमासयोरन्वाधानेनतं प्रधा
नयागात्पूर्वं यदि ग्रहणं स्यात् तदा पूर्वोक्तमग्निहोमं च कुर्यात्। एवं प्र
हमाध्यायां विकृतावपि॥ इष्टिमध्ये भये समुपस्थिते यत इदं नयामहे
स्वाम्मिहानिभस्यानि रिनिद्वाभ्यां हुत्वा कर्मं समापयेत् कर्तुमशक्यं च
समारोप्य कालांतरे विश्रेप प्रायश्चित्तं कृत्वा पथिकृतमुखेनेष्टिं कु

Indira Gandhi National
Centre for the Arts

र्यात्॥ जुव्हेदीनां दारुमयाणां काकाद्युपहतौ तक्षणेमुल्लोदकेन
॥५४॥ क्षालनमत्रापि॥ अमेध्यादिभिरस्पृंतोयदृतौ त्यागः॥ एवं मृन्मयादीना
मपि॥ अंतरामनुष्य मार्जारादिगमने सर्वप्रायश्चित्तं॥ आज्यस्कंदने
निर्वापादिस्त्रुग्गतान्याज्यानां॥ यंतस्कंदेयुस्तदादर्याजभगमन्यजस्त
तोमायज्ञस्यासीरागःउतु॥ पितृंजनमगन्यजस्ततो मा॰ तु॥ ३ पंचानां
जनमगन्यज्ञस्ततो॰ तु॥ ३ दिशोजनमगन्यस्त॰ तु॰ ४॥ आपोजनमगन्यज्ञः
॰ तु॥ ५॥ ओषधीर्जिन्वमगन्यज्ञः॰ तु॥ ६॥ वनस्पतिंजनमगन्यज्ञः॰ तु॥ ७॥
इत्येतेःसप्तभिस्कंदनेपुनराज्यस्योत्पत्तिः॥ किंचिच्छेदनोत्पत्तिः॥ स्कन्न राम
प्रायश्चित्तमेवं॥ बर्हिषादौ स्कंदनेन प्रायश्चित्तं उत्तं न यात ह्यं॥ भस्म ५५

न्यग्नौ द्रविध्यांनेवयात्॥ गोविंचाद्दोषः॥ कूर्चा वत्सस्यपाणौ वेस्कन्न
दोषेनविद्यतइति॥ अथपुरोडाशं वेदनेनस्म प्रमृज्येत्येनदारभ्यपाः
त्रायति द्यापयातिश्यंनपुरोडाशमुद्रुत्य पतेत् स्फुटे द्यातदापुरोडा
शंतस्व कुलनिवामादाय्यत्न मुसतासिक्तिमुनोकाः आतःयांतरिहा
गाद्अघोरेयज्ञियोभूत्वासीदसदनस्वमामासीदसदनंस्व॥ इति मंत्रेण
बर्हिषि निधाय॥ माहिंसादेवप्रेरितआज्येनतेजसाज्यस्व मानः किं
चनरीरिषः॥ योगक्षेमस्यशांत्या अस्मिन्नासीदबर्हिषि इत्यभिमंत्रका
लेसर्वप्रायश्चित्तं कुर्यात्॥ इदंचाश्वलायनोक्तमापस्तंबानामपिस
मानंस्वसूत्रेअनुक्तत्वात्॥ अथाग्रयणे चातुर्मास्येषु एककपालदहो

Indira Gandhi National
Centre for the Arts

मा पूर्वस्कंदेत्स पर्यावर्त्तेनव॥ प्रजापतेर्वर्तनिमनुवर्तस्वानुवीरैरनुरा
॥ ४५॥ ध्यासगोभिरन्वश्वैरनुसर्वैरुपुष्टैः॥ अनुप्रजयान्विंद्रियेण देवानोय
ज्ञमृतुधानयंतु॥ इतियथारूढापयति॥ तंयजमानानुमंत्रयतेप्रतिक्षत्रे
प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु॥ प्रतिप्रजायांप्रति
तिष्ठामि भव्ये॥ विश्वामन्यामभिवावृधतदन्यस्यामधिश्रितं दिवे
विश्वकर्मणो पृथिवींत्वाकरन्नमः॥ इतिमंत्रेण आस्कांद्यौः पृथि
वीमस्कान्ऋषभोयुवागाः॥ स्कन्नेमाविश्वाभुवनास्कन्नोयज्ञः प्रज
नयतुस्वाहा॥ द्यावापृथिवीभ्यामिदं अस्कानजनिप्राजन्यास्कन्ना राम
ज्जायतेवृषा॥ स्कन्नात्प्रजनिषीमहिस्वाहा॥ द्यावापृथिवीभ्यां ४५

इतिद्वाआहुतिर्जुहुयात्॥ होमादूर्ध्वंयदि इतः पर्यावर्तेनस्त्रुवाग्रेण
समंकुर्यात्॥ पुरोडाशादि अमेध्यदेशगतंस्कन्नेहीनहविरप्र
क्षिप्यपुनरग्निहोत्रहवण्यादानादिना हविरुत्पत्तिंकृत्वासर्वप्राय
श्चित्तंहुत्वायागंकुर्यात्॥ अमेध्यदेशलक्षणंदेवलेनोक्तं यत्रप्रसूयन्
नार्याम्रियतेदह्यतेपिवा॥ चंडालाध्युषितंयत्रयत्रविष्ठादिसंगतिः
एवंकश्मापसंयुक्ता अमेध्याभूमिरुक्ता र्त्तिनाइति॥ एवंभूतंहविर्दुष्ट
मित्युच्यते॥ तदप्सुप्रक्षिप्ययथोक्तंप्रायश्चित्तंकर्तव्यं॥ केशादिप
तितेपुनर्देशमुद्धृत्यगार्हपत्यभस्मनाचप्रक्षितेनयागंकुर्यात्॥ आ
मिक्षायामेकदोहनाशेतंपुनरुत्पाद्ययागः॥ उभयदोहनाशे आग्नेय

Indira Gandhi National
Centre for the Arts

याग॥ वाजिनेष्वाज्यमेव प्रतिनिधिः तत्र सर्वत्र सर्वप्रायश्चित्तमात्रं
॥ ५६ ॥ न सानाय्यप्रायश्चित्तं॥ प्रधानयागात्पूर्वं हविः केशकीटादिना दुष्टम
पहृतं वा तदपहृतं हविरप्सु प्रक्षिप्य सर्वप्रायश्चित्तं कृत्वा पुनस्त
स्मिन्नेव प्रयोगे तद्देवत्यं हविर्निर्वाप प्रभृति संपाद्यान्यैरदुष्टैः सह
यजेत्। प्रधाने निष्टे तेन पुनरुत्पत्तिः॥ स्विष्टकृतादिशेषं आज्येनैव कु
र्यात्॥ जुह्वां गृहीतमवदानं व्यापन्नं नष्टं वा पुनरायतनादवदाय या
गः कर्तव्यः॥ सर्वप्रायश्चित्तं च॥ अत्र तंडुलादिषु आपिष्टकरणात्प्र
क्षालनेन शुद्धिः॥ पाकादूर्ध्वं त्यागः अल्पं नोपहतो॥ अल्पोपहतो राम
प्रोक्षणादिना शुद्धिः॥ एवमाज्यगृहीतानां सर्वेषां नाशोपविन ॥ ५६ ॥

करणाद्यान्यसंस्कारं कृत्वा यजमानं मनुमंत्रणं कृत्वा च
नुरवनेन सर्वयागं समाप्य पुनस्तेषु वाग्निषु न्यामिष्टिं यथापूर्वं कु
र्यात्॥ असर्वनाशे यन्नष्टं तद्देवत्य एव यागः॥ व्यापन्नं जले प्रक्षि
प्य उक्तः॥ यदा पुरोडाशो ब्रह्मपक्षे भवेत् तदा तामिष्टिं समाप्य दक्षिणा
स्थाने चतुः शरावमोदनं पक्त्वा चतुरो ब्राह्मणान् भोजयेत्॥ तेषु कोभा
र्गवो नियतः॥ अयमपक्षोदोषः सान्नाय्ये आज्येन नाशितत्र सर्वप्रा
यश्चित्तमेव॥ आश्वलायनानामपि हविरपक्वसमानं॥ हविषएकदे
शे दग्धे तच्छेषेणेष्ट्वा सर्वप्रायश्चित्तं कृत्वा तामेव देवतां पुनर्यजेत्॥ तस्मि
न्प्रयोगे दक्षिणां दद्यात् यद्यात्॥ नक्षत्रिगम्यः सर्वशो दग्धे तत्प्रयोगं

समाप्यपुनरन्वाधानादियागः॥आवाहनकालात्पूर्वंहविर्दोषेतस्थे
॥४०॥ तद्धविषःपुनरुत्पत्तिंकृत्वायागसमाप्तिः॥आवाहनादूर्ध्वंहविर्दोषेआ
ज्येनेष्टिंसमाप्यपुनर्यजेत्प्रधानद्रव्यातिरिक्तानांगौणानानाशेआक
र्मसमाप्तेरुत्पत्तिंकृत्वातेनतेनांगेनयजेत॥प्रधानद्रव्याणांस्विष्टकृत्पू
र्वमेवोत्पत्तिःनोत्तरत्रेति॥हविषांकाकादिशंख्यपक्षवानेवाद्दविदु
ष्टिंनिहुत्वातद्धविरप्सुप्रक्षिप्यपुनर्हविरुत्पत्तिंकृत्वायजेत॥चरुरु
त्सेकेनाग्न्युपघातेनस्खलनेनमासिदाधानंसर्वप्रायश्चित्तंचापस्तं
बमते॥बौधायनेनतुयस्यांदिशुत्सेकस्तांदिग्गाधिपतिनाममंत्रेणा राम
पिस्कचाहुतिरधिका॥इध्माबर्हिषोरनधानिदग्धातौस्येनदारभ्य ॥४०॥

उत्तरेणाहवनीयमासादनपर्यंतंदेवात्पातःपततिचेत्पुनःसंस्थाप्य
कालेसर्वप्रायश्चित्तंकुर्यात्॥अन्वाधानोत्तरंशोकादिनाश्रुकरणे
आज्यभागोत्तरंदेशकालौसंकीर्त्यअन्वाधानोत्तरमश्रुपातप्रत्यवा
यपरिहारार्थंव्रतभृतेघिस्ठानेपूर्णाहुतिंहोष्यामीतिसंकल्प्ययज
न्तांचतुर्गृहीतंगृहीत्वाअग्नयेव्रतभृतेस्वाहा॥इतिहुत्वासर्वप्रायश्चि
त्तंच॥पत्न्याअपएवमेव॥इदमाश्वलायनानामपि॥यजमानपत्न्याश्च
व्रत्येदिनेअनृतवदनेसीमातिक्रमेनिषिद्धभक्षणेस्त्रीसंगेषुबुद्धिपू
र्वकरतस्कंदनेव्रतपतेघिस्त्रानेपूर्णाहुतिंहोष्यामि॥अग्नयेव्रतप
तयेस्वाहेतिहुत्वासर्वप्रायश्चित्तंचअबुद्धिपूर्वकस्कंदनेसर्वप्रायः

Indira Gandhi National
Centre for the Arts

॥४८॥ ग्निं कुम्भोदेर्जुहुयात् योपूतस्थमन्येनयथा स्तेनोयथाभ्रूणहैवमे
षभवतियोयोनोरेनःसिंचातियदस्याचानमेनोभ्रूणहत्यायास्तस्मान्मु
च्यतेइति स्कन्दकर्मापि कुर्यात्॥ होमाभावेजपोवा॥ हूयमानाहुति
योरेवाहिः परिधिस्कंदेत्॥ अध्वर्युमाग्नीध्रमादएनांजुहुधीति॥ त
तःअग्निभोज्वलितानाभावाद्यस्माद्धोकारयाजुहोति॥ तस्मैपूर्णपा
त्रौजयेयमानोदद्यात्॥ अश्वलायनानांदेवानांजनमंत्रेणाग्नौ धोभि
मृश्येतिविशेषः॥ परिधिनिधानोभरंचयानेभ्यः प्राक्हुयादेवहिः
परिधिदेशाद्यंगारःपतेत्तदा अध्वर्युःस्रुवस्यबुध्नेनपीडयेत् मा राम
तमोमाय जस्तमन्मायजमानस्तमत्॥ नमस्तेअस्त्वायतेनमोरुद्र ॥४८॥

परायतेनमोयत्रासिषीदसीति॥ यादिदूर्वतः अध्वर्युर्माहिंसी
र्यजमानंमाहिंसीरिति॥ ततस्तमंगारंआदाययज्ञदेवनिकृतेरूप
स्थानंदेवेभ्यः पाहिदत्वामेविद्वान्॥ सकृज्जात्स्वपकृतादिमामदंत
इदनोदेवामायशर्मयच्छतोतआदधनाम् प्रक्षिप्यसहस्रश्टंगाद्
पभोजातवेदास्तोमपृष्ठो घृतवान्स्वप्रतीकः॥ मानोहिंसी नाधितो
नेत्वाजहामगोपोषंचनोवीरपोषंचयच्छस्वादेति होमः॥ सर्वप्राय
श्चित्तंचदक्षिणतोब्राह्मणंमाहिंसीर्यजमानं॥ पश्चाद्धोतारंमा
हिंसीः॥ उत्तरतोअग्नीध्रंमाहिंसीर्यजमानंमाहिंसीःपशून्मा
हिंसीरिति॥ आश्वलायनानां॥ अत्रोनदंगारस्कंदेडेनानिदध्या

त॥मानस्तोमायमजस्तानमायअपति मतपनमम मेअस्वायतेनमोरुद्र
॥४९॥ परायतेनमोयज्ञनिपा।इति॥ब्रा॰लणंमाहिंसिर्यजमानंमाहिंसी।रिति
पश्चात॥आग्ना।धंमाहिंसार्यजमाहिंमि रिष्कलरलं॥इतियथादिश
माभिनं माथेनमनुजहरेत॥आहंयजेददेनिकेतरुपस्थानंदेवपारि
ददामिविद्वान॥स्कप्रजास्त्वंशतहिमामदनद्दहनोदेवामायिगामयाऊ
तेति॥अथजदतमंगारंब्रआमिनुहोति॥महस्रशृंगोवृषभो॰नीकः
मानोहिंसी॥इंमितान्त्वाजहामिगोपोषंचनोवीरपोषंचयच्छन्त्वा इति
ततःसर्वप्रायाश्चित्तंच॥अथदर्शपूर्णमासंवात।या तदापाथिकृतोवै राम
श्वानरो।चकृत्वा अतिपन्नयागंकुर्यात। उभेवामममानतंत्रे॰ पाथि ४०

कृन्मुखेनातिपन्नयागंकुर्यादिति केचित॥ अन्यस्याग्निषुदर्शादिक
रणेस्वाग्निषु अन्यो वाधानकरणं आग्नावेष्टकेइष्टिसाग्निपुरुत्वापु
नर्दर्शादिकरणं॥ अन्योग्निं नयेत् श्रौताग्निचान्तरलौकिकाग्निंवा
अथवास्वाग्नि।नःसहा।ग्नान्यवेयाल्लौकिकान्वयात्दाएपुनिमि
त्तेषु पाथिकृत॥॥आश्वलायनानांकेवरुणालिकाले नवैश्वानराअ
न्यगमानंसर्वंचप्रायश्चित्तेषु।नांस्थानंतम्यैतस्यैदेवतायैद्वादश
गृही।तेनाष्टगृही।तेनचतुर्गृही।तेनवास्त्रुवपूर्णवापूर्णाहुतिंजुहुया
न॥नचपुरोनुवाक्यामनुच्ययान्ययाजुहोति॥आपिवाचतुर्थंतन्नाम
मुक्त्वास्वाहेतिजुहोति॥दर्शपूर्णमासादोअग्नो।धलोपेसर्वप्रायश्चि

Indira Gandhi National
Centre for the Arts

नं कुर्यात्॥ एवमन्येष्वपि॥ आग्रयणमकृत्वा नवान्नभक्षणे वैश्वान
॥८०॥ रेष्टिं कुर्यात्॥ इष्ट्यसंभवे पूर्णाहुतिं वा॥ ततः शारदे समर्दे वनक्षत्रे वा
वा आग्रयणं कुर्यात्॥ प्रथमाग्रयणे शरत्काले अस्तादिप्रतिबंधवसं
तादर्वाक् गौणकालेपि शुद्धकाले एव कुर्यात्॥ पुराणधान्यालाभे दु
र्भिक्षादौ अस्तादावपि कार्यं प्रोषिते यजमाने पत्नी नाग्रयणमनुकल्पं
कृत्वा नवान्नं भुंजीत॥ ते नित्यप्रथमपौर्णमासी पत्नी रजस्वलादिनास्ता
दिप्रतिबंधेन वा अनारब्धायामागामिपौर्णमास्यां विधिशिष्टिपूर्वक
मारंभणीयः॥ एवं दर्शादिप्रथमाग्रयणस्य शरत्स्यये प्रथमचातुर्मास्या गम
नां उदगयनाश्रये च विकृतिष्वपि॥ तत्र विकृतिष्वपि प्रयोगः॥ दर्शकाथ ॥८०॥

नांते पौर्णमासेष्टिकाले पत्न्या अनालंभुकत्वेन अस्तादिप्रतिबं
धेन वा अनारंभजनितप्रत्यवायपरिहारद्वारा श्रीपरमेश्वरप्री
त्यर्थं इष्ट्या यक्ष्ये अमावास्यतंत्रं॥ आग्नेयमष्टाकपालं निर्वपेद
द्रमेकादशकपालं वा सौम्यं चरुं॥ अधिश्रयणकाले आग्नेय
स्य सौम्यस्य च ले पंगृहीत्वा ऐंद्रे क्षिपति॥ पंचदशसामिधेन्यो वार्त्र
घ्नौ आज्यभागौ अन्वाहार्यो दक्षिणा॥ याज्यानुवाक्ययोर्विशेषः
सपत्नघ्नान्नवं स्याग्ने घृतेनेन संयता॥ इंद्र हंतं थ भानुनो ३ म॥ ये ३
य जाम द्वाग्नि निकाव्या वेधसः शश्वत स्कृद्वं दधानो नर्या पुरूणि
अग्निर्भवद्रयिपती रयीणां सत्राचक्राणो अमृतानि विश्वा॥ ३ वो

Indira Gandhi National
Centre for the Arts

इत्याग्नेयस्य॥ इंद्रो देवो विश्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु
॥५२॥ केवलः॥ अमु॥ ये॥ अयजाम इंद्रमिंद्र नरो नेमधिता हवंते यत्पार्या युनजते
धियस्ताः॥ शूरो नृषाता शवसश्चकान आगोमति व्रजे भजा त्वं नः॥
॥ अवौ॥ ३॥ इति इंद्रस्याज्य॥ नः सोम विश्वतो रक्षा राजन्नघायतः॥ न
रिष्येत्वावतः सखा॥ अमु॥ ये॥ अयजाम हे सोम या ते धामानि दिवि
या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु॥ तेभिर्नो विश्वैः सुमना अहे
ळन्राजन्सोम प्रति हव्या गृभाय॥ अवौ॥ ३॥ इति सोमस्य इष्टस
भवे पूर्णाहुतिर्वा जुहुयात्॥ अध्वर्युर्नावेदव्यानादेवा इष्टिदिने राम
प्रातरग्निहोत्रहोमानंतरं देशकालौ संकीर्त्य पौर्णमास्यां इष्टा ॥५३॥

ने पौर्णमासेष्टि देवतयोः पूर्णाहुतिं होष्यामि॥ आहवनीयेवि
हृत्य लौकिकाग्निं न आश्वलायन श्रेयान् मुख्यपर्योक्त प्रकार
ण पूर्णाहुतिं कुर्यादिति॥ इति दर्शपूर्णमास प्रायश्चित्तानि॥ अ
यथाने प्रायश्चित्तानि॥ आधाने ब्रह्मौदनपाकात्पूर्वं ब्रह्मौदना
ग्निनाशे स्वस्वगृह्योक्तं सोमपालनाग्न्यनुगमनप्रायश्चित्तं कृत्वा
ब्रह्मौदनादिकार्यं सर्वाधानिनः॥ असर्वाधानिनस्तु पुनरेकदेश
मारभ्य सर्वप्रायश्चित्तं हुत्वा ब्रह्मौदनं कार्यं॥ पाकादूर्ध्वमरणिनि
ष्पनात्पूर्वमनुगमने पूर्ववदग्निमुत्पाद्य पुनर्ब्रह्मौदनादि समान
यद्यानांतं कुर्यात्॥ तत्रैवं करणाशक्तौ तं प्रयोगं मुख्यं कालात्

Indira Gandhi National Centre for the Arts

रेपुनःसंभाराहरणादिकार्यं मंथनानंतरं जातस्याग्नेर्निवर्तमान
॥ ५२॥ जपात्पूर्वमनुगमने स्फुलिंगन्यायेन तदनादत्यपुनर्मंथने॥ ननु
प्रायश्चित्तं जाते निवर्तमानजपे संभारेषु निधानात्प्रागमनेन प्रयो
गं परित्यज्य कालांतरे आदधीत॥ तत्र प्रायश्चित्तानुपदेशात्॥ के
चित्तु जनानां जातत्रयजपित्वा पुनर्मंथनं कार्यं॥ प्रवृत्तप्रयोगस्य त्या
गे प्रमाणाभावादित्याहुः॥ अथ दक्षिणाग्निरुद्धरणानंतरं मंथनो
त्तरं वाहरणानंतरं वा संभारेषु निधानात्प्रागनुगमने जनानां जातत्रयं
जपित्वा पुनः स्वस्थाने तदुत्पाद्य संभारेषु निदध्यात्॥ आहवनीयः राम
स्यानुगमने भूतः स्यात्सति दक्षिणाग्नौ हुत्वा पुनरुद्धृत्यायतने निदध्या ॥५२॥

त्॥ दक्षिणाग्निरुद्धरणात्पूर्वं मुद्धृतस्याग्नेरुद्धरणे। यं स्यानुगमने
जनानां जातत्रयं जपित्वा पुनरुद्धरणादिकार्यं॥ आधानोत्तरमिष्ट्य
भावात्पूर्वं गार्हपत्यस्याहवने। यस्य वानुगमने तेन तदवसाने स्थामं
थनं जनलक्षणाभावेन निःसारणं। गार्हपत्यभस्म नासंस्पृश्य मंथनेन॥
एवमाहवने। यत्कौशिककारणं। माथित्वायतने निधायाग्निवादयोहोत
व्यं॥ नानलप स्थानं॥ एवमाधानेष्टेः प्राग्दक्षिणतरं प्रवृत्त्यनुपपत्तेः ए
वं दक्षिणाग्न्यनुगमने स्वयोनितदुत्पाद्य सर्वं प्रायश्चित्तं कुर्यात्॥ स
र्वं कस्याधानस्याहवनीयसंपादकेनेति पक्षे उद्धितमध्यमो नाम
नुगमने प्रयोगो त्सर्गोन प्रायश्चित्तमिति केचिदाहुः॥ तत्र कस्या

Indira Gandhi National
Centre for the Arts

ननुमतं॥ केचित्तु इष्टं तमाधानमर्थात् निपक्षे आधानस्यासमाप्तेः पु
॥५३॥ नराधानेनतदुत्पाद्यते अन्वाधानमेवे गयतनेनानिधायमित्यादिहोमइत्या
हु॥ आधानोत्तरमिष्ट्यर्थमन्वाधाने कृते अग्नेरनुगमने अन्वाहित
प्रायश्चित्तं॥ सर्वेषामाकर्मपरिसमाप्तेः॥ अत्रानग्न्यस्याहवनीयस्य
गार्हपत्यानानुगतत्वं गोलो किं कारणं॥ नामथित्वायतनेनानिधायान्वा
हितप्रायश्चित्तमाहुः॥ प्रथमेष्टेसमासादामुनरस्यान्वाधानात्पूर्व
मनुगमनेनान्वाहितप्रायश्चित्तं॥ अन्वाधानसंस्कारस्य लुप्तत्वात्
अन्यथापुनरन्वाधानोपदेशोनर्थकः स्यात्॥ किंतुयोनितउत्पाद्यमि गम
त्यादिहोमः सर्वप्रायश्चित्तंच॥ पूर्णाहुतेः प्राक्सस्याकस्यानिदेगजो ५३

पेपूर्णाहुतिं हुत्वाभुवइतिदक्षिणाग्नौजुहुयात्॥ अत्रसर्वत्रानुगताआ
हवनीयस्यहोमः॥ व्याहृतीभिः स्रुवेण॥ ततमंतेनपौनीतिकेचित्॥ अ
नुगते होमइत्यपरे॥ अथाग्न्यनुगत्यामर्यादया गार्हपत्याधा
नात्संभवतेप्रत्नागंधाग्न्यज्यकालोतेरादभ्यात्॥ केचित्तु कालस्या
गत्वातल्लोपेः नाशानंतयं सर्वप्रायश्चित्तं हुत्वागार्हपत्याधानकर्तव्य
मिति तत्रप्रायश्चित्तं गिवाजपातेगार्हपत्ये कर्तव्यो॥ एवमाहवनीया
धानेकल्पानंतरनमाग्नेयस्यदक्षिणाकालात्पूर्वंपत्नी। रजस्वलाचेत्
प्रयोगमुत्सृज्यकल्पांतरमादध्यात्॥ दक्षिणादानादूर्ध्वं चेन्नामपरू
प्यसमापनीयं॥ एवमाधानप्रारभ्यतोभयमप्याशौचमितिकेशवः॥ गा

Indira Gandhi National
Centre for the Arts

र्हपत्याधाने यदेष्टिकं प्रायश्चित्तं तत्सर्वपूर्णाहुत्या कर्तव्यं॥ नातरन
॥५४॥ न्वाकाचेत्तामपरुध्यसमानायं॥ ततःपूर्वे चेत्प्रयोगे स्वर्गगतं इयं। कारःए
वमाधाने अनारब्धदर्शपूर्णमासत्वात्॥ चातुर्मास्यादिषु निरूढेषु च अ
नुगमन प्रायश्चित्तं दर्शपूर्णमासवत्॥ अथारणीनाशे प्रायश्चित्तं॥ तत्र
बोधायनेन समारूढयोरग्न्योर्वारण्योरुपहतनिमित्तादुपहतयोः प्राय
श्चित्तमुच्यते॥ अमेध्यश्वचांडालगर्दभशूद्रवायसपातितरजस्वलाभि
श्चारस्पृष्टाभिमर्शेऽरण्योर्विनाशः॥ अयोग्यतास्यादित्यर्थः॥ तत्रामेध्य
शब्देनमत्रपुरीषलोहितादयो गृह्यंते। एतेषामुपहतेर्दारुमयपात्राणां गम
त्यागमादित्यागः॥ अत्र देवलोक्यादौ॥ मानुषास्थिगर्भविष्ठारेतोनिष्ठ ॥५५॥

त्रमेव च॥ स्वेदाश्रुपूयिकाश्लेष्माः मेध्यं तामेध्यमुच्यते चांडालशब्देन
सर्वप्रतिलोमः॥ रजस्वलाशब्देन सूतिकापि॥ एतैर्निमित्तैरुपहतयोः समा
रूढयोररण्योर्विनाशः॥ अन्यसंस्पर्शे इत्यपुनराधानं कर्तव्यं॥ एवंत
ब्रह्मदासदारणे॥ तयोर्म्यानीनवाकुर्यात्॥ सर्वत्रान्वाहार्येण दक्षिणा
याः समुच्चयः॥ इति प्रायश्चित्तदीपः॥ अथ बोधायनः॥ यद्यरणी। नर्णोन्वा
तां जंतुर्निर्मथनेन वा समानेन वा अन्वारण्योः। आदरमावास्यामुपोष्य
श्वोभूते दर्शेन ध्यानस्मिंजीर्णे शाकलं। कृत्यगार्हपत्ये प्रक्षिप्य प्रज्वाल्यद
क्षिणेनोत्तरारणीमादायसत्ये नाधरारणीमुपर्यग्नौ धारयेति॥ उद्बुध्यस्वा
ग्नेविशस्वयोनिमन्यां देवयज्यां वोढवा जातवेदः॥ अरण्यारणी। मनुसंक्रम

स्नर्नो। र्णानन्तुमन्नीर्णयानिर्गुदमे स्यथान्यंतयो निर्कलिकइत्यरण्योर
॥५९॥ ग्निं समारोप्य मंथनस्यात्र्यागार्हपत्यमाधित्या विहारां कल्पइत्यागार्ह
पत्येआन्यंविलाप्योत्पूयम्नुचिनतुर्गंहीनंगृही वा आहवनीयेसंततं
जुहोति॥ मनोन्त्योनिर्नुषनामानंविछिन्नंयज्ञः समिमंदधातु॥ याइ
ष्टा उषसोनिम्नुचश्चुताः संदयामिदविषा घृतेनतस्वाहेत्यथानयन्तमने
ष्टाकपालं निर्वपत्यगागवंदक्षिणादद्यानिमाकोसइष्टिः संतिष्ठते
अथप्रयोगः॥ यपरणा।जीर्णेस्यानांजनुर्मंथनेनवा॥ कार्यंक्षमेस्यान्तां
दग्धेनष्टेपत्नदेनवानिवर्तनेनदारुसंधानामविस्तारः नात्यपूर्वारण्योः राम
समन्येरनुपभुक्तः॥ उक्तलक्षणंलक्षितं कार्यक्षमंनवं अन्येअरण्यासं ५९

पायअभावास्यायां प्रातरग्निहोत्रं हुत्वा॥ अश्वत्थादस्यवानाद्विजाता
मध्येस्ततंयाज्ञियात्संभगसि। शानत्योनिःसमागतं मत्वसे प्रजनाग
नेभ्रातुर्मयिधेह्यायुर्व्रजमाने इत्येनान्याभरणाआन्दत्यअग्न्या
धानादिकृत्वापेत्याश्वोन्नतेदर्शनह्यानार्णेनावगारणा। सन्ना प्रगार
णं। मादाय गार्हपत्याग्निरूपाग्निधार्यतिजपंति। इन्दुभ्यस्त्वाग्नेनाविश
स्वयोनिमिलित्सोनमंत्रमुक्ताअर्धंनेयोनिरितिमंत्रेणवारण्योः समा
रोपणयोः इतः प्रथममित्यादिनामंथनादिकृत्वा॥ गार्हपत्यानेयनं
गोमयेनोपलिप्यायतनेग्निं निधायाग्निहृदयग्रणा। यमनन्तनं हुत्वातं
तुमनाग्निं कुर्यात्॥ अग्निहोत्रप्रसंगेनप्रायश्चित्तानिरूपणं॥ अकारि

Indira Gandhi National
Centre for the Arts

॥५६॥ तोरोरुद्रेणनृसिंहस्तेनतुष्यतु॥ ॥इतिधर्मलिखानपुरश्चासितोरोनारा
यणात्मजरुद्रदेवकृष्णनायनारसिंहआपस्तंबाश्वलायनयोरग्निहो
त्रहोमप्रयोगनिर्णयअग्निहोत्रहोमदर्शपूर्णमासेष्टिचातुर्मास्यआ
धानप्रायश्चित्तानि॥ ७ ॥शके १७०५ दुंदुभिनामसंवत्सरे माहे आ
षाढवद्य॥ १३ ॥मंदवासरः॥ तद्दिने पुस्तकं समाप्तं॥ ॥श्रीगुरुचरणात
त्परविष्णुनारायणदेवधर॥ श्रीयज्ञनारायणार्पणमस्तु॥ ७ ॥

श्लोक ८००

राम

॥५६॥

Indira Gandhi National Centre for the Arts